# .. shrI subrahmaNya pancharatnaM ..

## ॥ श्री सुब्रह्मण्य पञ्चरत्नं ॥

विमलनिजपदाब्जं वेदवेदान्तवेद्यं
    ममकुलगुरुदेहं वाद्यगानप्रमोहम्
रमणसुगुणजालं रङ्गराड्भासितनेयम् ।
    कमलजनुतपादं कार्तिकेयं भजामि ॥ १॥
शिवशरवणजातं शैवयोगप्रभावं
    भवहितगुरुनाथं भक्तबृन्दप्रमोदम् ।
नवरसमृदुपादं नादह्रींकाररूपं
    कवनमधुरसारं कार्तिकेयं भजामि ॥ २॥
पाकारातिसुतामुखाब्जमधुरं बालेन्दुमौलीश्वरं
लोकानुग्रहकारणं शिवसुतं लोकेशतत्वप्रदम् ।
राकाचन्द्रसमानचारुवदनमम्भोरुहवल्लीश्वरं
ह्रींकारप्रणवस्वरूपलहरीं श्री कार्तिकेयं भजे ॥ ३॥
महादेवजातं शरवणभवं मन्त्रशरभं
    महत्तत्वानन्दं परमलहरीमन्दमधुरम् ।
महादेवातीतं सुखगणयुतं मन्त्रवरदं
    गुहं वल्लीनाथं मम हृदि भजे गृद्धगिरिशम् ॥ ४॥
नित्याकारान्निखिलवरद निर्मलं ब्रह्मतत्वं
    नित्यन्देवैर्विनुत चरण निर्विकल्पादियोगम् ।
नित्याद्यान्तं निगमविदित निर्गुणन्देवनित्यं
    वन्दे मम गुरुवरनिर्मलं कार्तिकेयम् ॥५॥
॥ इति श्री सुब्रह्मण्यपञ्चरत्नं सम्पूर्णम् ॥

---

Encoded and proofread by antaratma at Safe-mail.net

---

Please send corrections to sanskrit@cheerful.com
Last updated March 16, 2006